# shatrusaMhArakamekadantastotram

# શત્રુસંહારકમેકદન્તસ્તોત્રમ્ અથવા ગજવક્ત્રસ્તુતિઃ

## Document Information

Text title : shatrusaMhaarakamekadantastotram or Gajavaktrastuti

File name : shatrusaMhaarakamekadantastotram.itx

Category : ganesha, stotra

Location : doc_ganesha

Author : Traditional

Transliterated by : Karthik Chandan.P (kardan5380 at yahoo.com) : Amith K Nagaraj)

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : mudgalapurANa

Latest update : September 17, 2004

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શત્રુસંહારકમેકદન્તસ્તોત્રમ્ અથવા ગજવક્ત્રસ્તુતિઃ

શ્રીગણેશાય નમઃ ।
સનત્કુમાર ઉવાચ ।
શૃણુ શમ્ભ્વાદયો દેવા મદાસુરવિનાશને ।
ઉપાયં કથયિષ્યામિ તત્કુરુધ્વં મુનીશ્વરાઃ ॥ ૧॥

ગણેશં પૂજયધ્વં વૈ યૂયં સર્વે સમાવૃતાઃ ।
સ બાહ્યાન્તરસંસ્થો વૈ હનિષ્યતિ મદાસુરમ્ ॥ ૨॥

સનત્કુમારવાક્યં તચ્છ્રુત્વા દેવર્ષિસત્તમાઃ ।
ઊચુસ્તં પ્રણિપત્યાદૌ ભક્તિનમ્રાત્મકન્ધરાઃ ॥ ૩॥

દેવર્ષય ઊચુઃ ।
કેનોપાયેન દેવેશં ગણેશં મુનિસત્તમમ્ ।
પૂજયામો વિશેષેણ તં બ્રવીહિ યથાતથમ્ ॥ ૪॥

એવં પૃષ્ટો મહાયોગી દેવૈશ્ચ મુનિભિઃ સહ ।
ઉવાચારાધનં તેભ્યો ગાણપત્યો મહાયશાઃ ॥ ૫॥

એકાક્ષરેણ તં દેવં હૃદિસ્થં ગણનાયકમ્ ।
વિધિના પૂજયધ્વં ચ તુષ્ટસ્તેન ભવિષ્યતિ ॥ ૬॥

ધ્યાનં તસ્ય પ્રવક્ષ્યામિ શૃણુધ્વં સુરસત્તમાઃ ।
યૂયં તં તાદૃશં ધ્યાત્વા તોષયધ્વં વિધાનતઃ ॥ ૭॥

એકદન્તં ચતુર્બાહું ગજવક્ત્રં મહોદરમ્ ।
સિદ્ધિબુદ્ધિસમાયુક્તં મૂષકારૂઢમેવ ચ ॥ ૮॥

નાભિશેષં સપાશં વૈ પરશું કમલં શુભમ્ ।
અભયં સન્દધન્તં ચ પ્રસન્નવદનામ્બુજમ્ ॥ ૯॥

ભક્તેભ્યો વરદં નિત્યમભક્તાનાં નિષૂદનમ્ ।

એતાદૃશં હૃદિ ધ્યાત્વા સેવધ્વમેકદન્તકમ્ ॥ ૧૦॥

સર્વેષાં હૃદિ સંસ્થોઽયં બુદ્ધિપ્રેરકભાવતઃ ।
સ્વયં બુદ્ધિપતિઃ સાક્ષાદાત્મા ચ સર્વદેહિનામ્ ॥ ૧૧॥

એકશબ્દાત્મિકા માયા દેહરૂપા વિલાસિની ।
દન્તઃ સત્તાત્મકઃ પ્રોક્તઃ શબ્દસ્તત્ર ન સંશયઃ ॥ ૧૨॥

માયાયા ધારકોઽયં વૈ સત્તમાત્રેણ સંસ્થિતઃ ।
એકદન્તો ગણેશો વૈ કથ્યતે વેદવાદિભિઃ ॥ ૧૩॥

સર્વસત્તાધરં પૂર્ણમેકદન્તં ગજાનનમ્ ।
સેવધ્વં ભક્તિભાવેન ભવિષ્યતિ સદા સુખમ્ ॥ ૧૪॥

એવમુક્ત્વા યયૌ યોગી સ સનત્કુમાર આદરાત્ ।
જય હેરમ્બમન્ત્રં વૈ સમુચ્ચરન્ મુખેન સઃ ॥ ૧૫॥

તતો દેવગણાઃ સર્વે મનુયસ્તપસિ સ્થિતાઃ ।
એકાક્ષરવિધાનેન તોષયામાસુરાદરાત્ ॥ ૧૬॥

પત્રભક્ષા નિરાહારા વાયુભક્ષા જલાશિનઃ ।
કન્દમૂલફલાહારાઃ કેચિત્કેચિદ્ધભૂવિરે ॥ ૧૭॥

સંસ્થિતા ધ્યાનનિષ્ઠા વૈ જપહોમપરાયણાઃ ।
નાનાતપઃપ્રભાવેણ તોષયન્ ગણનાયકમ્ ॥ ૧૮॥

ગતવર્ષશતેષુ વૈ સન્તુષ્ટ એકદન્તકઃ ।
આયયૌ તાન્વરાન્દાતું ધ્યાતસ્તૈર્યાદૃશસ્તથા ॥ ૧૯॥

જગાદ સ તપોયુક્તાન્ મુનીન્દેવન્ગજાનનઃ ।
વરં વૃણુત તુષ્ટોઽહં દાસ્યામિ બ્રાહ્મણામરાઃ ॥ ૨૦॥

તસ્ય તદ્વચનં શ્રુત્વા હૃષ્ટા દેવર્ષયોઽભવન્ ।
ઉન્મીલ્ય લોચને દેવમપશ્યન્સમીપસ્થિતમ્ ॥ ૨૧॥

દૃષ્ટ્વા મૂષકસંસ્થં તં પ્રણેમુસ્તે ગજાનનમ્ ।
મુનયો દેવદેવેન્દ્રા પુપૂજુર્ભક્તિસંયુતાઃ ॥ ૨૨॥

પૂજયિત્વા યથાન્યાયં પ્રણમ્ય કરસમ્પુટાઃ ।
તુષ્ટુવુરેકદન્તં તં ભક્તિનમ્રાત્મકન્ધરાઃ ॥ ૨૩॥

દેવર્ષય ઊચુઃ ।
નમસ્તે ગજવક્ત્રાય ગણેશાય નમો નમઃ ।
અનન્તાનન્દભોક્ત્રે વૈ બ્રહ્મણે બ્રહ્મરૂપિણે ॥ ૨૪॥

આદિમધ્યાન્તહીનાય ચરાચરમયાય તે ।
અનન્તોદરસંસ્થાય નાભિશેષાય તે નમઃ ॥ ૨૫॥

કર્ત્રે પાત્રે ચ સંહર્ત્રે ત્રિગુણાનામધીશ્વર ।
સર્વસત્તાધરાયૈવ નિર્ગુણાય નમો નમઃ ॥ ૨૬॥

સિદ્ધિબુદ્ધિપતે તુભ્યં સિદ્ધિબુદ્ધિપ્રદાય ચ ।
બ્રહ્મભૂતાય દેવેશ સગુણાય નમો નમઃ ॥ ૨૭॥

પરશુધારિણે તુભ્યં કમલહસ્તશોભિને ।
પાશાભયધરાયૈવ મહોદરાય તે નમઃ ॥ ૨૮॥

મૂષકારૂઢદેવાય મૂષકધ્વજિને નમઃ ।
આદિપૂજ્યાય સર્વાય સર્વપૂજ્યાય તે નમઃ ॥ ૨૯॥

સગુણાત્મકકાયાય નિર્ગુણમસ્તકાય તે ।
તયોદભેદરૂપેણ ચૈકદન્તય તે નમઃ ॥ ૩૦॥

દેવાન્તાઽગોચરાયૈવ વેદાન્તલભ્યકાય તે ।
યોગાધીશાય વૈ તુભ્યં બ્રહ્માધીશાય તે નમઃ ॥ ૩૧॥

અપારગુણધામાયાનન્તમાયાપ્રચરિણે ।
નાનાવતારભેદાય શાન્તિદાય નમો નમઃ ॥ ૩૨॥

વયં ધન્યા વયં ધન્યા યૈર્દૃષ્ટો ગણનાયકઃ ।
બ્રહ્મભૂતમયઃ સાક્ષાત્પ્રત્યક્ષં પુરતઃ સ્થિતઃ ॥ ૩૩॥

એવં સ્તુત્વા પ્રહર્ષેણ નનૃતુર્ભક્તિસંયુતાઃ ।
સાશ્રુનેત્રાન્સરોમાઞ્ચાન્દૃષ્ટ્વા તાન્ ઢુણ્ઢિરબ્રવીત્ ॥ ૩૪॥

એકદન્ત ઉવાચ ।
વરં વૃણુત દેવેશા મનુયશ્ચ યથેપ્સિતમ્ ।
દાસ્યામિ તં ન સન્દેહો યદ્યપિ દુર્લભં ભવેત્ ॥ ૩૫॥

ભવત્કૃતં મદીયં તત્ સ્તોત્રં સર્વાર્થદં ભવેત્ ।
પઠતે શ્રુણ્વતે દેવા નાનાસિદ્ધિપ્રદં દ્વિજાઃ ॥ ૩૬॥

શત્રુનાશકરં ચૈવ સુખાનન્દપ્રદાયકમ્ ।
પુત્રપૌત્રાદિકં સર્વં લભતે પાઠતો નરઃ ॥ ૩૭॥

ગૃત્સમદ ઉવાચ ।
એવં તસ્ય વચઃ શ્રુત્વા હર્ષયુક્તાઃ સુરર્ષયઃ ।
ઊચુસ્તમેકદન્તં તે પ્રણમ્ય ભક્તિભાવતઃ ॥ ૩૮॥

સુરર્ષય ઊચુઃ ।
યદિ તુષ્ટોઽસિ સર્વેશ એકદન્ત મહાપ્રભો ।
યદિ દેયો વરો નશ્ચેજ્જહિ દુષ્ટં મદાસુરમ્ ॥ ૩૯॥

ઇતિ શ્રીમુદ્ગલપુરાણાન્તર્ગતં સનકાદિકૃતમેકદન્તસ્તોત્રં સમાપ્તમ્ ।

Encoded by Karthik Chandan.P (kardan5380@yahoo.com)
and Amith K Nagaraj (amithkn@rediffmail.com)
Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*shatrusaMhArakamekadantastotram*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*